श्रीगुरुंभजे।प्रणम्यपरमानंदंमोहांधतिमिरापहं।तत्प्रसादबलेनैवक्रियतेबालबोधिनी।१।य
स्यस्मरणमात्रेणहीयंतेभवभीतयः।तंसर्वसाक्षिणंयामिशरणंकृपणोह्यहं।२।अथायमा
त्माकीदृशः।सद्रूपंसर्वथाभावरूपंचिद्रूपंशुद्धबोधरूपं।आनंदरूपं।स्वरूपसुखरूपं।स
त्यमबाधितं।नित्यंत्रिकालस्थायि।कूटस्थमविकारि।अस्थूलादिगुणकं।स्वप्रबोधैक
रूपं।आदिमध्यांतरहितं।अद्वितीयं।एवमात्मवस्तु।तदाश्रयात्तद्विषयान्नाद्यविद्या।यथाग
र्भागारमंधकारस्यविषयाश्रयो।तदाश्रयत्वतद्विषयत्वबलेनावरणविक्षेपरूपंप्राप्यतमे
वंस्फुरद्रूपमात्मानंस्वरूपमाच्छाद्यविक्षेपति।यद्यप्यवस्त्वविद्यातथाप्यात्मसत्तास्फूर्तिप्रा
प्यवस्तुवद्भाति।यथानिर्मलादर्शसन्निकर्षस्थवस्तुनोनिवारितंप्रतिबिंबंजायते।तद्वत्कूट
स्थचिदाभासोपिसत्वादिगुणत्रयात्मिकायामविद्यायांप्रतिफलति।तन्मध्येकारणभूतसत्वां
शेप्रतिबिंबितोयश्चिदाभासःसोहमित्यभिध्यानादीश्वरइत्युच्यते।सत्वगुणोपाधिकत्वात्
सर्वज्ञत्वंसर्वेश्वरत्वंसर्वकार्यकर्तृत्वंचतस्य।तस्याःसत्वगुणप्रधानकारणरूपमायाया। १

ध्यानकार्यभूतरजस्तमोंशाधिकबुद्धिप्रतिबिंबितोयश्चिदाभासःसयदाकर्मनिमित्तवशाद्दे
शकालवस्तुत्रिविधंपरिच्छेदंगृहीत्वास्वस्वरूपंपूर्णंविहायसजातीयविजातीयस्वगतभे
दंप्राप्याहंममेत्यध्यासंकरोतितदाजीवइत्युच्यते।अस्यकार्योपाधिकत्वाज्जाड्यंतेनाहंक
र्ताहंभोक्तास्मिसुख्यहंदुःखीमामहंनजानामीत्यभिमन्यते।श्रुतिरपि।कार्योपाधिर
यंजीवःकारणोपाधिरीश्वरः।जाग्रत्स्वप्नसुषुप्त्यवस्थात्रयभेदेनजीवजगतोर्भेदस्त्वंगीकृतो
स्तिशास्त्रेविश्वतैजसप्राज्ञव्यावहारिकप्रातिभासिकपारमार्थिकइति।जाग्रन्नामजीवस्यस्थू
लोव्यवहारः।स्वप्नइतिसूक्ष्मः।यतःसूक्ष्मशरीरमात्रंगृहीत्वाजीवोव्यवहरति।सुषुप्तिरिति
बुद्ध्यादिकार्यकारणरूपंसर्वंजगत्कारणेज्ञानेलयंयातीतिकारणावस्थेत्युच्यते।एतदे
वावस्थात्रयंव्यष्टौविराड्हिरण्यगर्भाव्याकृतरूपेणसमष्टावितिजीवस्वरूपं।सएवचिदा
भासोमनःप्रभृतिष्विंद्रियेषुप्रतिफलितोनामरूपकर्मात्मकंस्थूलत्वंप्राप्यजगद्भवति।सृ
ष्टिस्थितिप्रलयात्मकंभावाभावरूपंसमष्टिव्यष्ट्यात्मकंजगत्कारणस्यमनसोनानारूप

त्वान्नानाभवति।श्रुतिरपि।कामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंम
नएव।जीवजगतोरस्वतंत्रत्वातजीवानांकर्मफलदातृत्वेनजगत्सृष्टिस्थितिप्रलयप्रतिपा
दनेनेश्वरःकल्पितोवेदांतेईश्वरस्तूपाधिसंबद्धगुणत्रयभेदेनब्रह्मविष्णुरुद्रादिरूपेणजगत्सृ
ष्ट्यादिकंकरोतीति।एवमविद्यायाआवरणविक्षेपरूपद्वयं।येनसमष्टिव्यष्ट्यात्मकंआब्र
ह्मस्तंबपर्यंतंनवविधसंसारनिर्वाहइति।ननुकथंकेवलस्यासंगोदासीनस्यनित्यमुक्तस्य
शुद्धस्यगुणातीतस्याहंकारममकारेच्छाद्वेषप्रयत्नरहितस्याविक्रियस्यकूटस्थस्यचिद्घनस्यै
करसस्यपरमात्मनोनरविषाणसदृशादवस्तुनस्तुच्छाद्दर्पणमुखरज्जुसर्पशुक्तिरजतमृगतृ
ष्णिकाजलतुल्यादज्ञानादावरणविक्षेपौसंभाव्येते।यथागगनारविंदंसुरभीत्युक्तेगगना
रविंदमसतस्तस्यसुरभित्वंकुतः।सत्यं।एतत्सर्वमविद्यावरणविक्षेपरूपंवस्तुगत्यानास्त्येव।
किंत्वज्ञानात्मनोरविवेकाद्भ्रममात्रसिद्धं।यद्भ्रममात्रसिद्धंतत्किंसत्यंभवति।यदास्वप्नं
पश्यतिजनस्तदाकिंतंप्रतिस्वाप्नोव्यवहारःसत्यतयानप्रतिभाति।ऐंद्रजालिकोवा।पुनरं २

पिस्वप्नेनिवृत्तेऐंद्रजालिकमायानिवृत्तौचसर्वंमिथ्यैवेतिजानाति।इदंतुसर्वेषामनुभवसि
द्धं।तद्वत्ज्ञानोत्पत्तेःप्राक्सत्यमित्येवनिश्चिनोतितदनंतरंमिथ्यैवेति।ज्ञातेअज्ञानेत
त्कार्यंचावरणविक्षेपरूपंस्तुतरांनपश्यति।येसंसारसमुद्रपारगमनेसंजातकामाभ्र
ष्टातेवेदांतरहस्यमेतदमलंश्रुत्वाश्रुतीहसंमतं।छित्वाशेषविरोधिमोहनंज्ञानासिना
भानुवद्दीप्तायांतिकृतार्थतामनुगताःकैवल्यसंज्ञंपदं।इतिबहिर्मुखांतःप्रवणबाल
बोधिन्यांप्रथमकल्पः।इदानींमुमुक्षोःपुरुषार्थसिद्धावनाद्यविद्याप्रतिबंधनिवृत्त्य
र्थंसाधनप्रकाराउच्यंते।तत्रादौपूर्वकांडोदितनिःकामकर्मानुष्ठानादंतःकरणशु
द्धिःकथंस्यात।यतोवैदिककर्मानुष्ठानात्पुण्योपचयेपापक्षयाद्रजस्तमसोर्निवृत्तिद्वारारा
गद्वेषनिराकरणं।यथावृक्षस्यबीजंकारणंबीजस्यापिवृक्षःकारणंतद्वद्रजस्तमसीपाप
वृद्धेःपापवृद्धिरपिरजस्तमसोरितिपरस्परानुबंधित्वादेकस्यापिनाशेइतरस्यापिनाशः।इ
त्यंतःकरणशुद्धिः।ततोनित्यानित्यवस्तुविवेकःसंपद्यते।यथानिर्मलादर्शेप्रतिबिंबःतथा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

शुद्धांतःकरणेविवेकोत्पत्तिः॥इहव्यवहारभूमौकिंनित्यंवस्तुकिमनित्यंचेतिविचारः॥ननुनित्या
नित्यवस्तुकीदृशंयदागमापायितदनित्यंयथाघटः॥एतद्विलक्षणंनित्यमितिनित्यानित्यवस्तु
विवेकः॥ततइहामुत्रार्थभोगविरागः॥कीदृशोविरागः॥आब्रह्मस्तंबपर्यंतंयस्यमनसिसर्वथा
ऽनवरतंछर्दितान्नमिवभवति।तदेववैराग्यमितिइहामुत्रार्थभोगविरागः॥ततःशमदमादि
संपत्तिः॥यस्यविषयेभ्योंतःकरणनिवृत्तिरत्यंतंसशांतः॥यस्यविषयेभ्योबहिःकरणानांसर्वथा
निवृत्तिःसदांतः॥यस्योभयथाविषयग्रहणनिवृत्तिरत्यंतंसउपरतः॥यस्यसुखदुःखभयाभय
लाभालाभजयाजयस्तुतिनिंदादौसर्वथैवोपेक्षाबुद्धिःसतितिक्षुः॥एवंभूतस्याधिकारिणःस
मग्रःसंसारबंधोविलीयतेयदातदातस्यमुमुक्षुत्वंभवति।इतिशमदमादिसाधनचतुष्टय
संपत्तिः॥इदानींविविदिषुर्भवति।आत्मानंज्ञातुमिच्छति।ज्ञानादेवतुकैवल्यमितिश्रुतेः॥ज्ञानं
तुश्रवणमंतरेणनसंभवतीति।आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइति
श्रुतेः॥तस्मात्संन्यासपूर्वकंश्रवणंकर्तव्यं।श्रवणंनामश्रुतिवाक्यज्ञानं।उपक्रमोपसंहारेय ३

न्महातात्पर्यंतस्यषड्विधलिंगेनश्रुतेरवधारणंश्रवणं।षड्विधलिंगंतावत।उपक्रमोपसंहाराव
भ्यासोपूर्वताफलं।अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णये।श्रवणांत्वंगित्वादन्यनिरपेक्षतया
त्मज्ञानंजनयति।तस्यज्ञानस्यकोमलकंटकन्यायेनादृढमूलत्वान्मंदमध्यमाधिकारिणो
रसंभावनाविपरीतभावनेउत्पद्येते।केतेऽसंभावनाविपरीतभावने।सहस्रधाश्रुतेपिश्रुत्य
र्थेदेहेंद्रियव्यतिरिक्तआत्मानसंभाव्यतेइतीयमसंभावनाबहुधाश्रुत्वाविचार्यचानात्मनि
आत्मप्रतीति।आत्मन्यनात्मन्यप्रतीतिर्विपरीतभावनातन्मध्येऽसंभावनानिवृत्त्यर्थंमन
नं।मननंनामगुरुमुखाच्छ्रुत्वायःश्रुत्यर्थोवधारितः॥तस्ययुक्त्याप्रतिपादनंमननं।मननस्य
युक्तिरूपत्वादसंभावनानिवर्त्तकत्वं।यथाग्रामादिस्थितेचंदनवृक्षेअज्ञस्यासंभावनाभव
ति।नेदंचंदनमितितंपुनरन्यःकश्चिद्युक्त्याप्रतिबोधयति।तदासंभावयति।विपरीतभावनानि
वृत्त्यर्थंनिदिध्यासनं।निदिध्यासनंनामश्रवणमननाभ्यांयएवार्थोनिश्चितइदमित्थमिति
दृढीकृतस्तस्यपुनःपुनर्यदनुचिंतनंतद्ध्यानंनिदिध्यासनं।यथाशुक्तिशकलेविवेकाद्याथा

र्थेनपरिज्ञातेरजतमितिविपरीतज्ञानंनिवर्त्तते।तथानिदिध्यासनेविपरीतभावनानिवर्त्तते।ननुकु
तःश्रवणमनननिदिध्यासनैरतस्यापिसंसारेप्रवृत्तिर्दृश्यते।सत्यं।तस्यात्मसाक्षात्काराभावात्सं
सारेप्रवृत्तिर्दृश्यते।यदापुनर्दीर्घकालनैरंतर्यातिशयादरेणश्रवणादिकंकरोतितदात्मसाक्षा
त्कारेजातेसकार्याविद्यानिवर्त्तते।संसारप्रवृत्तेरपिनिवृत्तिः।नन्वसमंजसमिदंभाति।यतो
जनकादीनामपिसंसारप्रवृत्तिर्दृश्यते।सत्यं।संसारप्रवृत्तेःप्रारब्धत्वात्तेषांप्रवृत्तिः।प्रारब्धंहि
भोगादेवक्षयंयाति।जीवन्मुक्तानामपितथासकारणंप्रारब्धंतिष्ठति।कारणंचाज्ञानं।भ्रष्ट
बीजवदज्ञानमस्तिप्रारब्धंहियथारज्जुस्वरूपेज्ञातेसर्पज्ञानंनिवर्त्तते।तथापिभयकंपादिकंप्रवर्त्त
तएवतद्वत्तत्त्वात्मसाक्षात्कारस्यतुरीयावस्थांगतस्यजीवन्मुक्तस्याज्ञानंप्रारब्धभोगश्च
भवतीत्यविरोधः।यस्यतुकाकतालीन्यायेनसमसमयएवात्मसाक्षात्कारःप्रारब्धनाशश्चतस्य
तदानीमेवस्वरूपावस्थितिः।यस्यसाक्षात्कारेजातेपिप्रारब्धशेषोवर्त्ततेतस्यजीवन्मुक्तस्यप्रा
रब्धभोगार्थंशरीरधारणं।एवंसाक्षात्कारेनिःशेषाविद्याप्रतिबंधध्वंसःततःप्रारब्धभोगक्षयेशरीर ४

पाताद्विदेहकैवल्यंभवतीतिपरमपुरुषार्थसिद्धिः।विशुद्धबुद्धयोधीराःज्ञानदीपकराःकरे।पश्यंतिमणिव
च्छित्वातमोब्रह्मपरंत्वयत।इतिशंकराचार्यविरचिताबालबोधिनी।शब्दस्पर्शरूपरसगंधादयोविष
याःपंचपृथिव्यादयश्चपरमात्मनःसमुत्पन्नाः।तस्माद्वाएतस्मादात्मनःआकाशःसंभूतः।आकाशाद्वा
युःवायोरग्निरग्नेरापोद्भ्यःपृथिवीपृथिव्याऔषधयःऔषधिभ्योन्नं।अन्नात्पुरुषइत्येवंपृथिव्यप्तेजोवा
य्वाकाशमिंद्रियाण्यहंकारोबुद्धिर्महानव्यक्तं।अव्याकृतमित्युच्यते।तत्रपृथिवीधारणे।आपःपिं
डीकरणेक्लेदनेच।तेजःपचनेप्रकाशनेच।वायुर्व्यूहनेच।आकाशमवकाशप्रदाने।आकाशमे
कलक्षणं।द्विलक्षणोवायुः।त्रिलक्षणंतेजः।आपश्चतुर्लक्षणाः।पंचलक्षणापृथिवी।शब्दगुणमाका
शं।परस्परानुप्रवेशेनशब्दस्पर्शगुणोवायुः।शब्दस्पर्शरूपगुणंतेजः।शब्दस्पर्शरूपरसगुणाआ
पः।शब्दस्पर्शरूपरसगंधगुणापृथिवी।इत्येतत्स्थूलशरीरंसदसदात्मकं।मनःसंकल्पविकल्पा
त्मकं।इंद्रियाणिविज्ञानशक्तयःक्रियाशक्तयश्च।विज्ञानशक्तयःश्रोत्रंत्वक्चक्षुर्जिह्वाघ्राणमि
तिपंच।क्रियाशक्तयोवाक्पाणिपादपायूपस्थाख्यानिपंच।प्राणापानव्यानोदानसमानाइतिपं
चवायवः।मनोबुद्धिरहंकारश्चित्तमित्यंतःकरणचतुष्टयं।अभिमानलक्षणोहंकारःबोधलक्षणा

बुद्धिः।चैतन्यलक्षणंचित्तं।महान्प्राणोहिरण्यगर्भः।परिस्पंदात्मासूत्रंवायुरित्येतत्सूक्ष्मंशरीरं।अव्यक्त
मव्याकृतंप्रधानंबीजंक्षेत्रंतमइतिसुषुप्तं।सपरमात्मानित्यशुद्धबुद्धमुक्तसत्यस्वभावआकाश
वदवस्थितः।सदेवसोम्येदमग्रआसीदित्यादिलक्षणः।सपरमात्मेहप्रविष्टःसर्वेषुभूतेषुस्थित्वा
श्रोत्रेणशब्दंप्रतिपद्यते।त्वचास्पर्शंप्रतिपद्यते।चक्षुषारूपंप्रतिपद्यते।जिह्वयारसंप्रतिपद्यते।ना
सिकयागंधंप्रतिपद्यते।वाचावक्तव्यंप्रतिपद्यते।हस्ताभ्यांगृहीतव्यंप्रतिपद्यते।पद्भ्यांगंतव्यंप्र
तिपद्यते।पायुनाविसर्जयितव्यंप्रतिपद्यते।उपस्थेनानंदयितव्यंप्रतिपद्यते।मनसामंतव्यंप्रति
पद्यते।बुद्ध्याबोद्धव्यंप्रतिपद्यते।अहंकारेणाहंकर्तव्यंप्रतिपद्यते।चित्तेनचेतयितव्यंप्रतिपद्य
ते।तमसाविकारंप्रतिपद्यते।सपरमात्माक्षेत्रज्ञः।कर्ताजीवोविज्ञानात्मामणिवदुपाधिविशेषभेदाद्भिद्य
ते।तंविदित्वाऽकर्तारमात्मानंनलिप्यतेकर्मणापापकेनेति।इतिप्रथमंपुरं। ।श्रोत्रमध्यात्मंश्रोतव्यमधि
भूतंदिशस्तत्राधिदेवतं।त्वगध्यात्मंस्पर्शयितव्यमधिभूतंवायुस्तत्राधिदेवतं।चक्षुरध्यात्मंद्रष्टव्य
मधिभूतंआदित्यस्तत्राधिदेवतं।जिह्वाअध्यात्मंरसयितव्यमधिभूतंवरुणस्तत्राधिदेवतं।नासिका
अध्यात्मंघ्रातव्यमधिभूतंपृथिवीतत्राधिदेवतं।वागध्यात्मंवक्तव्यमधिभूतंअग्निस्तत्राधिदेवतं।हस्त ५

वध्यात्मंआदातव्यमधिभूतंइंद्रस्तत्राधिदेवतं।पादावध्यात्मंगंतव्यमधिभूतंविष्णुस्तत्राधिदेवतं।पायुर
ध्यात्मंविसर्जयितव्यमधिभूतंमित्रस्तत्राधिदेवतं।उपस्थोध्यात्मंआनंदयितव्यमधिभूतंप्रजापति
स्तत्राधिदेवतं।मनोध्यात्मंमंतव्यमधिभूतंचंद्रस्तत्राधिदेवतं।बुद्धिरध्यात्मंबोद्धव्यमधिभूतंब्रह्मा
तत्राधिदेवतं।अहंकारोध्यात्मंअहंकर्तव्यमधिभूतंरुद्रस्तत्राधिदेवतं।चित्तमध्यात्मंचेतयितव्य
मधिभूतंक्षेत्रज्ञस्तत्राधिदेवतं।तमोध्यात्मंविकारयितव्यमधिभूतंईश्वरस्तत्राधिदेवतं।एवमध्या
त्ममधिभूतमधिदेवतंतत्सर्वमुक्तंसपरमात्मानिर्विकल्पोनिरवयवोनिर्गुणोनिरंजनः।सर्वतःसर्व
व्यापीसर्वज्ञःसूक्ष्मोनित्योविरजोक्षरंपरंब्रह्मविज्ञानमानंदंब्रह्मसत्यंज्ञानमनंतंब्रह्मप्रज्ञाप्रतिष्ठा
प्रज्ञानंब्रह्म।पुरुषएवेदंसर्वंतेनेदंपूर्णंपुरुषेणसर्वमित्येतेर्विशेषणैर्विशेषितंपरंब्रह्म।तदेवाह
मोमितिप्रतिपद्यते।नीलंमहत्सुगंध्युत्पलमितिवत्।इतिद्वितीयंपुरं। ।शब्दादयआत्मानंनजानं
ति।परस्परमप्यन्यज्ञातृकत्वाच्छब्दाद्यघटादिवद्दृश्यत्वाच्च।एवंदेहेंद्रियमनोबुद्धिसंघातआत्मानंन
जानातिपरस्परमप्यन्यज्ञातृकत्वाच्छब्दादिवद्दृश्यत्वाच्च।शरीरमप्यात्मानंनजानाति।घटादिवद्दृ
श्यत्वात्।इंद्रियाण्यात्मानंनजानंतिप्रदीपवद्दृश्यत्वात्।मनआत्मानंनजानातिइंद्रियवद्दृश्यत्वात्
।बुद्धिरप्यात्मानंनजानातिमनोवद्दृश्यत्वात्।अहंकारआत्मानंनजानाति।बुद्धिवद्दृश्यत्वात्।चि
त्तमात्मानंनजानाति।अहंकारवद्दृश्यत्वात्।तमोपितद्वत्।सुखदुःखादयोरागादयश्चात्मानंन

जानंति। चित्तं वद् दृश्यत्वात्। स्वप्ने इंद्रियाणां मनोबुद्ध्यादीनामभावे शब्दादयो न ज्ञायंते नात्मा नास्तितस्मान्ना
हं कर्त्ता द्रष्टेवाहं सर्वप्रत्ययसाक्षित्वात्। अपवरकमध्यप्रदीपवत्। स्वभावेनैव प्रकाशयति। यथा गृह
प्रविष्टमार्जारादीन् विनाप्रयत्नेनाभिमानरहितः स्वभावेनैव प्रकाशयति। तथा बुद्धिगृहे ज्ञप्तिस्वरू
पः स्वयंज्योतिरात्मा। अत्रायं पुरुषः स्वयंज्योतिर्भवति। स्वेन भासा सर्वमिदं विभाति। न तत्र सूर्यो भाति न
चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्येव
मादिवचनेभ्यः बुद्धितद्वृत्तीनां चक्षुरादिद्वारेणोत्पद्यमानानां रूपाद्याकारप्रत्ययानां सुखदुःखमोहा
त्मकानामप्यंतरस्मृतीच्छाप्रयत्नरागद्वेषाभिमानरहितः स्वभावेनैव प्रकाशयति यस्मात्तस्माच्छुद्धत्वं बु
द्धत्वं नित्यत्वं सर्वज्ञत्वं [illegible]त्वं अचलत्वं अनामरूपत्वं विकाररहितत्वं कूटस्थत्वं अशनायापिपासे
प्राणस्य शोकमोहौ मनसो जरामृत्यु शरीरस्येति। योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीति यदिदं किं
चाश्वभ्य आशकुनिभ्य आकीटपतंगेभ्यः प्रकृतेरन्यमिति। तस्मात्सिद्धं नात्मन इति। जाग्रत्स्वप्नसुषु
प्तेष्वेक एवात्मा। जागरिते वैश्वानरः स्वप्ने तैजसः सुषुप्ते प्राज्ञः स एव निर्विशेषस्तुरीयः स परमात्मा सोहमि
ति। श्रीः। इति त्रिपुरी समाप्ता। सर्गस्थितिप्रलयहेतुमचिंत्यशक्तिं विश्वेश्वरं विदितविश्वमनंतमूर्तिं। नि
र्मुक्तबंधनमपार सुखांबुराशिं श्रीवल्लभं विमलबोधघनं नमामि।१। यस्य प्रसादादहमेव विष्णुर्म
य्येव सर्वं परिकल्पितं च। इत्थं विजानामि सदात्मरूपं तस्यांघ्रिपद्मं प्रणतोस्मि नित्यं।२। तापत्रयार्कसं ६

तप्तः कश्चिदुद्विग्नमानसः। शमादिसाधनैर्युक्तः गुरुं च परिपृच्छति।३। अनायासेन येनास्मान्मुच्येयं भवबंधनात्।
तन्मे संक्षिप्य भगवन्केवलं कृपया वद।४। साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते। इदं तदिति विस्पष्टं सा
वधानमतिः शृणु।५। तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः। तादात्म्यविषयं ज्ञानं तदिदं मुक्तिकारणं।
६। को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः। तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत्।७। अत्र ब्रूमः
समाधानं कोन्यो जीवस्त्वमेव हि। यस्त्वं पृच्छसि मां कोहं ब्रह्मैवासि न संशयः।८। पदार्थमेव जानामि नाद्या
पि भगवन्स्फुटं। अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद।९। सत्यमाह भगवानत्र विज्ञानं नैव विद्यते। हे
तुः पदार्थबोधो हि वाक्यार्थावगतेरिह।१०। अंतःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः। आनंदरूपः सत्यः सन्
किन्नात्मानं प्रपद्यसे।११। सत्यानंदस्वरूपं धीसाक्षिणं ज्ञानविग्रहं। चिंतयात्मतया नित्यं त्यक्त्वा देहादिगां
धियं।१२। रूपादिमान्यतः पिंडस्ततो नात्मा घटादिवत्। पृथिव्यादिमहाभूतविकारत्वाच्च कुंभवत्।१३। अनात्मा
यदि पिंडोयमुक्तहेतुबलान्मतः। करामलकवत्साक्षादात्मानं प्रतिपादय।१४। घटद्रष्टा घटाद्भिन्नः सर्व
था न घटो यथा। देहद्रष्टा तथा देही नाहमित्यवधारय।१५। एवमिंद्रियदृङ्नाहमिंद्रियाणीति निश्चिनु।
मनोबुद्धिस्तथा प्राणो नाहमित्यवधारय।१६। संघातोपि तथा नाहमिति दृश्यविलक्षणं। द्रष्टारमनुमानेन
निपुणं संप्रधारय।१७। देहः स्वव्यतिरिक्तद्रष्टृकः दृश्यत्वात्। यो यो दृश्यः स स्वव्यतिरिक्तद्रष्टृको दृष्टः यथा घ
टः। तथा चायं देहो दृश्यस्तस्मात्स्वव्यतिरिक्तद्रष्टृक एवेति। देहेंद्रियादयो भावा हानादिव्यापृतिक्षमाः। यस्य

सन्निधिमात्रेणसोहमित्यवधारय।१८।अनापन्नविकारःसन्नयःकांतवदेवयः।बुध्यादींश्चालयेत्प्रत्यक्सोहमि
त्यवधारय।१९।अजडात्मवदाभांतियस्मान्निध्याज्जडाअपि।देहेंद्रियमनःप्राणाःसोहं।२०।अगमन्मेमनो
न्यत्रसांप्रतंचस्थिरीकृतं।एवंयोवेदधीवृत्तिंसोहं।२१।स्वप्नजागरितेसुप्तिंभावाभावौधियांतथा।योवेत्त्यवि
क्रियःसाक्षात्सोहं।२२।घटावभासकोदीपोघटादन्योयएष्यते।देहावभासकोदेहीतथाहंबोधविग्रहः।२३।
पुत्रवित्तादयोभावायस्यशेषतयाप्रियाः।द्रष्टासर्वप्रियतमःसोहं।२४।परप्रेमास्पदतयामानभूवमहंसं
दाभूयासमितियोद्रष्टासोहं।२५।यःसाक्षिलक्षणोबोधस्त्वंपदार्थःसउच्यते।साक्षित्वमपिबोधत्वेम
विकारितयात्मनः।२६।देहेंद्रियमनःप्राणाहंकृतिभ्योविलक्षणः।प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभि
।२७।त्वमर्थमेवंनिश्चित्यतदर्थंचिंतयेत्पुनः।अतद्व्यावृत्तिरूपेणसाक्षाद्विधिमुखेनच।२८।निरस्ताशे
षसंसारदोषोस्थूलादिलक्षणः।अदृश्यत्वादिगुणकःपराकृततमोमलः।२९।निरस्तातिशयानंदःसत्यप्र
ज्ञानविग्रहः।सत्तास्वलक्षणःपूर्णःपरमात्मेतिगीयते।३०।सर्वज्ञत्वंपरेशत्वंतथासंपूर्णशक्तिता।वेदैःस
मर्थ्यतेयस्यतद्ब्रह्मेत्यवधारय।३१।यज्ज्ञानात्सर्वविज्ञानंश्रुतिषुप्रतिपाद्यते।मृदाद्यनेकदृष्टांतैस्तद्ब्रह्मे
त्य।३२।यदानंत्यंप्रतिज्ञायश्रुतिस्तत्सिद्धयेजगौ।तत्कार्यत्वंप्रपंचस्यतद्ब्रह्मेत्य।३३।विजिज्ञास्यतयायच्च
वेदांतेषुमुमुक्षुभिः।समर्थ्यतेतियत्नेनतद्ब्रह्मेत्य।३४।जीवात्मनाप्रवेशश्चनियंतृत्वंचतान्प्रति।श्रूयतेय
स्यवेदेषुतद्ब्रह्मेत्य।३५।तत्त्वंपदार्थौनिर्णीतौवाक्यार्थश्चिंत्यतेधुना।तादात्म्यमत्रवाक्यार्थस्तयोरेवपदा ७
कर्मणांफलदातृत्वंयस्यैवंश्रूयतेश्रुतौ।जीवानांहेतुकर्तृत्वंतद्ब्रह्मेत्य।३६। १

र्थयोः।३७।संसर्गोवाविशिष्टोवावाक्यार्थोनात्रसंमतः।अखंडैकरसत्वेनवाक्यार्थोविदुषांमतः।३८।प्रत्यग्बोधो
यआभातिसोद्वयानंदलक्षणः।अद्वयानंदरूपश्चप्रत्यग्बोधैकलक्षणः।३९।इत्थमन्योन्यतादात्म्यप्रति
पत्तिर्यदाभवेत्।अब्रह्मत्वंत्वमर्थस्यव्यावर्तेततदैवहि।४०।तदर्थस्यचपारोक्ष्यंयद्येवंकिंततःशृणु।
पूर्णानंदैकरूपेणप्रत्यग्बोधोवतिष्ठते।४१।तत्त्वमस्यादिवाक्यंचतादात्म्यप्रतिबोधने।लक्ष्यौतत्त्वंपदा
र्थौद्वावुपादायप्रवर्तते।४२।हित्वाद्वौशबलौवाच्यौवाक्यंवाक्यार्थबोधने।यथाप्रवर्ततेस्माभिस्तथाव्या
ख्यातमादरात्।४३।आलंबनतयाभातियोस्मत्प्रत्ययशब्दयोः।अंतःकरणसंभिन्नबोधःसत्वंपदाभि
धः।४४।मायोपाधिर्जगद्योनिःसर्वज्ञत्वादिलक्षणः।पारोक्ष्यशबलःसत्याद्यात्मकस्तत्पदाभिधः।४५।प्रत्यक्
परोक्षतैकस्यसद्वितीयत्वपूर्णता।विरुध्यतेयतस्तस्माल्लक्षणासंप्रवर्तते।४६।मानांतरविरोधेतुमुख्या
र्थस्यपरिग्रहे।मुख्यार्थेनाविनाभूतेप्रतीतिर्लक्षणोच्यते।४७।तत्त्वमस्यादिवाक्येषुलक्षणाभागलक्षणा।
सोयमित्यादिवाक्यस्थपदयोरिवनापरा।४८।अहंब्रह्मेतिवाक्यार्थबोधोयावद्दृढीभवेत्।शमादिसहित
स्तावदभ्यसेच्छ्रवणादिकं।४९।श्रुत्याचार्यप्रसादेनदृढोबोधोयदाभवेत्।निरस्ताशेषसंसारनिदानपु
रुषस्तदा।५०।विशीर्णकार्यकरणोभूतसूक्ष्मैरनावृतः।विमुक्तकर्मनिगडःसद्यएवविमुच्यते।५१।प्रा
रब्धकर्मवेगेनजीवन्मुक्तोयथाभवेत्।किंचित्कालमनारब्धकर्मबंधस्यसंक्षये।५२।निरस्तातिशयानंदं
वैष्णवंपरमंपदं।पुनरावृत्तिरहितंकैवल्यंप्रतिपद्यते।५३।इतिलघुवाक्यवृत्तिःसमाप्ता। ।अनात्मभूतेदे

हादावात्मबुद्धिस्तु देहिनां। साविद्या तत्कृतो बंधस्तन्नाशो मोक्ष उच्यते।१। पृथिव्यप्तेजोवाय्वाकाशमादित्यो
द्योश्चेत्येतत्स्थूलं शरीरं। शुक्रशोणितसंभूतं। त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जा पितृतः त्वङ्मांस
शोणितमिति मातृतः इत्येतत्षाट्कौशिकं शरीरं। श्रोत्रं त्वक्चक्षुर्जिह्वाघ्राणमिति पंचबुद्धीन्द्रियाणि। वाक्पाणि
पादपायूपस्थाख्यानि कर्मेंद्रियाणि। प्राणापानव्यानोदानसमाना इति पंच वायवः। मनो बुद्धिरहंकार
श्चित्तमित्यंतःकरणचतुष्टयमिति एतत्सूक्ष्मशरीरं लिंगमित्युच्यते। उभयशरीरांतर्गतो विज्ञानात्मा। स
यावत्सर्ववेदशास्त्रोपनिषत्सु तत्त्वभूतं परमात्मानं न जानाति। तावत्संसरति। विदिततत्त्वः सर्वेषणाविनि
र्मुक्तो निस्पृहो निरीहः सर्वकामैरनाराधितमनाः स उच्यते। अहमेव परं ब्रह्म वासुदेवाख्यमव्ययं। इति स्या
न्निश्चितो मुक्तो बद्ध एवान्यथा भवेत्।१। विज्ञप्तिमात्रो हि सदा विशुद्धो बुद्धो हि यस्मात्सततं विमुक्तः। नादेयहे
योहमिति प्रतर्क्य तिष्ठेत्सदा ब्रह्ममयो विशोकः।२। अहमेव परं ब्रह्म न चाहं ब्रह्मणः पृथक्। इत्येवं समुपा
सीत ब्राह्मणो ब्रह्मणि स्थितः।३। यदा चित्तमसंसक्तं त्वदीयं सर्वकर्मसु। भवसीह तदा वत्स त्वमेव परमं पदं।
४। योसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः। अकायो निर्गुणो ह्यात्मा सोहमस्मि न संशयः।५। सर्वोपाधिविनि
र्मुक्तं चैतन्यं च निरंतरं। तद्ब्रह्माहमिति ज्ञात्वा कथं वर्णाश्रमी भवेत्।६। देशजात्यादिसंबंधान् वर्णाश्रमसम
न्वितान्। भावान्येतान्परित्यज्य स्वं भावं भावयेद्बुधः।७। यदा स्वचित्तात्प्रभवं विचित्रं विश्वस्य तत्रास्तमयं
च विद्वान्। प्रत्यक्षतः पश्यति शुद्धचक्षुरादर्शमध्यस्थमिवात्मरूपं।८। तदागमान्संपरित्यज्य सर्वानश्रद्धा ८

गृहीतोऽथ समाधियोगान्। तास्ताश्च युक्तीरनुमानगर्भीः सूक्ष्मार्थसंदीपनृताः।९। देहस्य च स्वस्य मृजाहिरण्यं जरादि
मर्त्यत्वमशेषतस्ततः। प्रदीप्तसूर्यानलरश्मियोगात् घृतस्य काठिन्यमिवापनेयं।१०। आमस्तकं पादतलावसाने
सांतर्बहिश्चर्मपटावनद्धं। तत्कृत्स्नमेवामृतराशिरूपममन्यतात्मानममर्त्यमित्थं।११। यत्तत्पदं ब्रह्मविदो व
दंति तपस्विनो ज्ञानसमाधियुक्ताः। अनादिविज्ञानमजं पुराणं गुहाशयं निष्कलमप्रपंचं।१२। निरंजनं निः
प्रतिमं निरीहमदृश्यमग्राह्यमचिंत्यरूपं। सनातनं ब्रह्म निरंतरं यत्तदेतदेवाहमिति प्रबुद्धः।१३। यो भावित
स्तिष्ठति निःप्रकंपः स ब्रह्मभूतोऽमृततामुपेति। पर्याप्तकामस्य कृतात्मनश्च इहैव सर्वे विलयंति कामाः।१४।
सोहं परं ब्रह्म जगत्समस्तमुदेति मत्तो मयि चास्तमेति। ईशोहमेवास्य चराचरस्य पिता च माता च पितामहश्च।१५।
ध्यानं समास्थाय परं चतुर्थं ध्यायंति मामेव विमुक्तकामाः। ब्रह्मादयो देवमनुष्यनागगंधर्वयक्षाप्सरसां ग
णाश्च।१६। मखैरनेकैरहमेव चेज्यो मामेव सर्वे प्रवदंति वेदाः। तपोभिरुग्रैर्विविधैश्च दानैर्मामेव सर्वे प्रति
पूजयंति।१७। भूतानि चाहं स्थिरजंगमानि यावंति भूतान्यहमेव तानि। एवं विधेष्वप्यपृथक्स्थितोहं मृदा
दिवन्मृन्मयभाजनेषु।१८। अहममृतमयोऽनमर्त्यमूर्तिरिति कथमिव नरः स्मरेत्स्वरूपं। निहितमुपनिषत्सु य
त्स तत्त्वं कथितमविस्तरतस्तदत्र सर्वं।१९। अहमेको न मे कश्चिन्नाहमन्यस्य कस्यचित्। न तं पश्यामि यस्याहं
तं न पश्यामि यो मम।२०। स्थूलं जागरितं प्रभिन्नरचितं प्रत्यक्षतो दृश्यते। स्वापं फेनतरंगबुद्बुदनिभं मायोपमं
चंचलं। सोषुप्तं तिमिरांधकारगहनं त्वव्यक्तमव्याकृतं लयं यात सकृद्विभातममलं सर्वत्र सर्वानुगं।२१। बुद्धि

पूर्वंतुयज्ज्ञानंबहिर्विषयसेवितंप्रत्यक्षमविरुद्धंचतज्जागरितमुच्यते।२२।अर्थाभावेतुयज्ज्ञानंप्रत्यक्षमिवदृश्य
ते।गंधर्वनगराकारंस्वाप्नंतदुपल[illegible]क्ष्यते।२३।जाग्रत्स्वप्नावुभावेतौयस्मिन्नित्यंप्रतिष्ठितौ।उत्पत्तिःप्रल
यश्चैवसुषुप्तमुपलक्ष्यते।२४।बीजभावश्चनिद्राचद्वयंयत्रनविद्यते।तत्तुरीयमितिज्ञेयमुत्पत्तिलयवर्जितं
।२५।यावदज्ञानभावःस्यात्तावत्संसारभावना।उदितंचेत्परंज्ञानंब्रह्मैवेदंसमंततः इति।२६।इतिस्वरूपंसमाप्तं।
। ।अथात्मज्ञानोपदेशविधिंव्याख्यास्यामः।मुमुक्षवेश्र[illegible]द्धानाययतयेवीतरागायआत्मलाभात्परोला
भाभावात।द्रष्टुर्दृश्योन्यइतिप्रसिद्धिर्लोके।अथकआत्मेति।देहस्तावदात्मानभवति।रूपादिमत्वेनोप
लभ्यमानत्वातघटादिवत।यथाघटादयोरूपादिमंतश्चक्षुरादिकरणैरुपलभ्यंते।एवंदेहोपिरूपादिमान्च
क्षुरादिकरणैरुपलभ्यते।यथादाह्यप्रकाश्यकाष्ठादिव्यतिरिक्तोदाहकःप्रकाशकोग्निः।तथादृश्याद्देहा
द्द्रष्टाव्यतिरिक्तआत्मासिद्धः।एतस्मादपिकारणाद्देहव्यतिरिक्तआत्मा।स्वापमरणादिदर्शनात।यस्मिन्का
लेदेहंसंव्याप्यवर्ततेआत्माकाष्ठाग्निवत्तदादेहोव्यवहारयोग्योभवति।यदादेहाद[illegible]पसर्पतितदादेहःका
ष्ठादिसदृशोभवति।तस्माद्देहव्यतिरिक्तआत्मासिद्धः।चक्षुरप्यात्मानभवति।रूपग्रहणसाधनत्वात्प्रदी
पवत।यथाप्रदीपेनकरणेनरूपमुपलभ्यते।तथाचक्षुषापिकरणेनरूपमुपलभ्यते।एवमेवेतराण्य
पिकरणानि।मनोप्यात्मानभवति।दृश्यत्वात्करणत्वाच्चप्रदीपवत।बुद्धिरप्यात्मानभवति।दृश्यत्वात्क
रणत्वाच्चप्रदीपवदेव।प्राणोप्यात्मानभवति।सुषुप्तेचैतन्याभावात।प्राणस्येतरस्मिन्कालेभृत्यस्वामिनो ८

८।

रिवसंकीर्णयोनज्ञायतेकस्येदंचैतन्यमिति।सुषुप्तेतुपुनर्विज्ञानरहितःप्राणउपलभ्यते।करणोपरमाद्विज्ञानाभा
वःप्राणस्येतिचेन्नस्वामिनिव्याप्रियमाणेकरणोपरमाभावात।राजपुरुषवत।अतएवनप्राणस्येतानिकरणानि
।यःस्वापेनोपरतस्तस्येतानिकरणानि।यदासौबहिर्निर्गम्यकरणान्यधितिष्ठतितदासर्वाणिकरणानिस्वस्ववि
षयेषुप्रवर्तंते।यदाजाग्रत्स्थितिनिमित्तंकर्मोद्भूतंभवतितत्क्षयेसर्वाणिकरणानिगृहीत्वाबुद्ध्युपाधिसंप
र्कजनितविज्ञानेनादायस्वप्नंसुषुप्तंवागच्छति।एवंस्थानत्रयमनवरतंगच्छति।कर्मनिमित्तंचेदंगमना
गमनं।स्वप्नजागरितेगच्छति।पुनःस्थानद्वयनिमित्तकर्मोद्भूतश्रमापनोदायसुषुप्तमपिगच्छति।प्राणो
पितत्कर्मवशादेवशरीरंपरिपालयन्वर्तते।स्वप्नसुषुप्तयोर्मृतिभ्रांतिपरिहाराय।अहमित्यपिचात्मानभवति
।सर्वैरात्मत्वेनाभिमतोपिप्रत्यगात्मविवेकरहितैर्दृश्यत्वातघटादिवत।व्यभिचारात्सुखदुःखाद्यनेक
संसारधर्मविशिष्टत्वाच्चकृशस्थूलादिधर्मविशिष्टदेहवत।यद्येवंदेहादिष्वनात्मत्वात्स्वात्मशंकाकु
तइतिचेत।द्रष्टृदृश्यविवेकाभावात।इतिप्रथमखंडः॥ ।अथसआत्माक[illegible]त्युक्तेभ्यःसर्वे
भ्योव्यतिरिक्तेभ्योंतरतमःआकाशवत्सर्वगतः।अहंकारममकारेच्छाद्वेषप्रयत्नरहितः।स्वयंज्योतिःस्वभा
वोग्न्युष्णवत्सवितृप्रकाशादिभूतरहितोबुद्ध्यादिकरणरहितः।सत्वादिगुणरहितः।प्राणादिवायुभेदर
हितः।अशनायापिपासाशोकमोहजरामरणप्राणबुद्धिविशिष्टत्वेनोपलभ्यमानत्वात्सर्वप्राणिहृदिस्थि
तइत्युच्यते।नपुनःसर्वगतस्यनिरवयवस्यात्मनोबुद्ध्याधारत्वंसंभवति।यथाकाशस्यनक[illegible]
[illegible]

धारा भवति। कथं पुनरहंकारममकारेच्छाद्वेषप्रयत्नरहितस्यात्मनो द्रष्टृत्वमित्युच्यते। द्रष्टृत्वं नाम दर्शनक्रिया
कर्तृत्वं। यदि दर्शनक्रियां करोतीति द्रष्टात्मा तदा अशेषबुद्धिद्रष्टृत्वं नोपपद्यते विरोधात्। यथा देवदत्तस्य क्र
मानुरोधेन युतायुतसिद्धकरणादिसव्यपेक्षया गमनागमनादिक्रियाकर्तृत्वं। नोभयप्रकारकरणसं
बंधरहितस्याविक्रियस्य दृग्रूपस्यात्मनो दर्शनादिक्रियास्यात्। यस्य तु पुनः करणादिसव्यपेक्षया द्रष्टृत्वं
क्रमद्रष्टृत्वमद्रष्टृत्वमन्यथा द्रष्टृत्वं चेष्यते। परिणामित्वात्करणादिनिमित्तसव्यपेक्षत्वाच्च चित्तवत्।
नैवमात्मनोऽल्पविषयद्रष्टृत्वं क्रमद्रष्टृत्वं अद्रष्टृत्वमन्यथा द्रष्टृत्वं चेष्यते। क्रियाभावात्। करणादिनिमित्त
निरपेक्षत्वाच्च प्रदीपवत्। कथं बुद्ध्यात्मनोः संयोग इत्युच्यते। सूक्ष्मत्वात्स्वच्छत्वान्निरवयवत्वाच्चोभयोस्त
त्र शुद्धप्रकाशस्वरूपा भवतीति कृत्वा बुद्ध्यात्मनोः संयोग इत्युच्यते। न पुनरमूर्त्तयोर्बुद्ध्यात्मनोर्जलकाष्ठव
त्संश्लेषः संभवत्यनन्यापेक्षत्वाच्च द्रष्टृत्वस्य। यथाहंकारममकारेच्छाद्वेषप्रयत्नरहितस्यादित्यस्य प्रका
शस्वरूपस्य सन्निधिसत्तामात्रेणाविक्रियमाणेन प्रकाशेन प्रकाशकत्वमन्यथा प्रकाशकत्वाभावात्तस्यै
वं प्रकाशस्वरूपसन्निधिसत्तामात्रेण वर्त्तमानस्यादित्यस्य प्रकाशकत्वमध्यारोप्यते अज्ञैः। प्रकाश्याभिव्य
क्त्यपेक्षया। एवमेव सर्वविक्रियाविशेषरहितस्यात्मनो दृग्रूपस्य अविक्रियस्य चैतन्यस्वरूपेणाव्यतिरेके
ण सर्वप्रत्ययसाक्षिणो द्रष्टृत्वमुपचर्यते। दृश्याभिव्यक्त्यपेक्षया न्यथा द्रष्टृत्वाभावात्तस्य। कथं सर्वविक्रिया १०
विशेषरहितस्यात्मनः कर्तृत्वमिति। उच्यते। भ्रामकवत्। यथा भ्रामकः स्वरूपसन्निधिसत्तामात्रेण लोहस्य भ्र

को भवति। एवमेव सर्वविक्रियाविशेषरहितोऽप्यात्मा कारकावभासको भवति। तत्र कारकावभासकत्वं नाम। बुद्ध्या
दीनि करणानि कारकाण्युच्यंते। तानि चैतन्यावसितानि स्वस्वविषयेषु प्रवर्त्तंते। तत्रैवं सति सर्वविक्रियाविशे
षरहितस्यात्मनः कर्तृत्वमुपचर्यते। एवमात्मानं कथं बुद्ध्या विजानीयादिति। तत्र शक्यते वक्तुं बुद्धेरवभा
सकत्वात्। आदित्यज्योतिर्वत्। यथादित्यो रूपेण न प्रकाश्यते तथात्मा न दृश्यते बुद्ध्या। एतस्मादप्यात्मा न दृ
श्यते बुद्ध्या बुद्धेर्वेद्याया वेदितृत्वानुपपत्तेः। यदि तस्यापि वेद्याया वेदितृत्वं स्यात्। तदा वेद्यता न स्यात्। समत्वा
त्प्रकाशयोरिव। इति द्वितीयः खंडः। तत्र जाग्रत्स्वप्नसुषुप्तान्युपन्यस्यंते बुद्धेरवस्थाविशेषाणि। तेषां प
रित्यागार्थमात्मविशुद्धिप्रतिपादनाय च। तत्र जाग्रन्नाम चक्षुरादीनि करणानि आदित्याद्यनुगृहीतानि स्व
स्वविषयेषु प्रवर्त्तंते। तत्र बुद्धिर्दीपकरणव्यापारमनुभवति। प्रत्यगात्मचैतन्यावज्वलिता भयात्मिका धी
र्दृष्टदृश्याकाराविपरिणमते। तत्र प्रत्यगात्मेति कस्मादात्मा विशिष्यते। व्यभिचारिणमनात्मत्वख्यापनार्थं।
तत्र बुद्ध्यादीनि करणानि घटादिवद्दृश्यभूतान्यपि बाह्यापेक्षया तारतम्यक्रमेण प्रत्यगात्मसंयोगादात्मनो
भवंति। उदकस्याग्निसंयोगाद्द्रवोष्णत्वं। न त्वात्मनः तत्संयोगादनात्मत्वं भवत्युदकसंयोगाद्वाग्नेरनुष्णत्वं।
न त्वात्मनः प्रत्यगात्मत्वं कदाचिदपि व्यभिचरति। आत्माभ्यंतरे वस्त्वंतराभावद्बुद्ध्यादीनामिव। अत एवा
त्मा प्रत्यगात्मविशेषणार्हः। एवं च सत्यव्यभिचरितमात्मत्वं ख्यापितं भवति। तत्र प्रत्यगात्मचैतन्यावज्वलि
ता धीर्दृष्टकाराविपरिणमते तप्तलोहवत्। दृश्याच्चक्षुरुपरक्ता सती विषयाकाररूपाणि निषिक्तद्रुतताम्रादिव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तत्रैवं सति तदुभयसाक्षिणः कालाकाशादिवत्सर्वगतस्य निरवयवस्याविक्रियस्य दृग्रूपस्यात्मनो जागरण
मिव भवति। अथ पुनः साधीरूपाद्याकारवासनावासितारूपाद्यंतरेण तुष्यपुटिकेवोभयात्मिकाविद्याको
मकर्मभिः प्रेर्यमाणसंस्काररूपाद्दृश्यत्वेन व्यवतिष्ठते। तद्दर्शनं स्वप्न इव भवति। तदनुकारित्वादात्मनो
जलचंद्रवत्। अथ पुनः साधीः स्फुरणारहितावासनारूपेण स्वरूपशून्याइव चेतन्यग्रस्ता सामान्यरू
पेण व्यवतिष्ठते। तत्सुषुप्तं वटकणिकायामिव वटवृक्षः॥ इति तृतीयः खंडः॥ ।तत्र चिन्मात्रस्वरूप ए
व आत्मा कार्यकारणाविद्याकामकर्मविनिर्मुक्तः सलिलवत्स्वच्छः स्वात्मस्थो भवेत्येतानि बुद्धिरवस्था
विशेषणानि नात्मनो विक्रियत्वादेतानि परित्यज्य तुरीय आत्मेति प्रतिपत्तव्यः। तत्र तुरीयत्वं नाम सुवर्ण
घनवद्विज्ञानघनत्वं तथापि चेतन्यस्वरूपसन्निधिसत्तामात्रेण साक्षिमात्रत्वं। तन्न स्थानांतरमात्मत्वप्र
तिपत्त्यभावाच्छून्यत्वप्राप्तेः कल्पितानां च निरास्पदत्वानुपपत्तेश्च। कथमेतान्यात्मविशुद्धिप्रतिपत्ति
हेतून्येतेषु सत्सु आत्मविशुद्धिरवगम्यते। कथमवगम्यत इत्युच्यते। एतेषु त्रिष्वपि स्थानेषु दृष्टत्वाव्य
भिचारात्सुषुप्ते व्यभिचरतीति चेत्। तन्न। तत्रापि दृश्यत्वमेव निवारयति सर्वलोकः कथं नाहमत्र सु
षुप्ते किंचिदप्युपलब्धवानिति नदृष्टिं तस्यास्तर्हि सर्वत्राव्यभिचारात्कूटस्थनित्यता सिद्धा। अत एव न
प्रमाणापेक्षा। असिद्धस्य हि वस्तुनः परिच्छित्तिं प्रति प्रमाणापेक्षा न आत्मनः। आत्मनश्चेत्प्रमाणापेक्षया
सिद्धिः। कस्य प्रमातृत्वं स्यात्। यस्य प्रमातृत्वं स एवात्मेति निश्चीयते। नन्वागमेनात्मा परिच्छिद्यते। नागमो ११

प्यात्मन्यध्यारोपितातद्धर्मनिवर्त्तकत्वद्वारेण ब्रह्मात्मनोरेकत्वं प्रतिपत्तिं प्रति प्रमाणत्वं प्रतिपद्यते। निर्ज्ञा
तपरपदार्थद्वयस्यानिर्ज्ञातार्थाभिव्यंजकत्वेन न तु फलरूपेण। स्वतःसिद्धत्वादात्मनः सोहमिति स्मृत्या
प्रतिसंधानात्। पुण्यापुण्यसंबंधाभावाच्च। स्थानत्रयव्यतिरिक्तत्वं। नित्यत्वं शुद्धत्वं बुद्धत्वं मुक्तत्व
मविक्रियत्वमपरिलुप्तदृग्रूपत्वं एकत्वं च स्वात्मनः स्वानुभवेनैवममसिद्धमिति जानाति विद्वाना
चार्यप्रसादादज्ञाननिद्राप्रतिबुद्धः संसारविनिर्मुक्तो विद्वानेष आत्मज्ञानोपदेशविधिः। एवं ज्ञात्वा
कृतकृत्यो भवति। नान्यथेत्येवं वेदांतानुशासनं वेदांतानुशासनमिति। इति श्रीमत्परमहंसपरिव्राज
काचार्यश्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य शंकरस्य कृतो आत्मज्ञानोपदेशविधिः संपूर्णः॥ संवत्
१७२७ वर्षे कार्त्तिक शुद्ध ७ मंगलवासरे। ।पूर्णस्यावाहनं कुत्र शुद्धस्याचमनं कुतः॥ निर्मलस्य कुतः स्ना
नं वस्त्रं विश्वोदरस्य च॥१ निरालंबस्योपवीतं रम्यस्याभरणं कुतः॥ निर्लेपस्य कुतो गंधः पुष्पं निर्वासनस्य
च॥२ बहिरंतःप्रकाशस्य धूपदीपप्रकल्पना॥ नित्यतृप्तस्य नैवेद्यं तांबूलं च कुतो हरेः॥३ अनंतापाररूप
स्य प्रादक्षिण्यं कुतो नतिः॥ पूजनं देवदेवस्य ह्येतदेवमुदाहृतं॥४। ।